प्रहस्त:, पुं, (प्रतत: प्रसृतो वा हस्तो यत्र ।) विस्तृताङ्गुलिपाणि: । चपेट: । इत्यमर: । २ । ६ । ८४ ॥ रावणसेनापतिविशेष: । यथा—

"ततो नीलाम्बुदप्रख्यं प्रहस्तो नाम राक्षस: ।
अब्रवीत् प्राञ्जलिर्वाक्यं शूर: सेनापतिस्तदा ॥"

इति रामायणे लङ्काकाण्डे ८ सर्ग: ॥

प्रहार:, पुं, (प्रहरणमिति । प्र + हृ + घञ् ।) आघात: । यथा, मार्कण्डेये ।

"करप्रहारेण शिरश्चामरस्य पृथक् कृतम् ॥"

प्रहारणं,क्ली,(प्र + हृ + णिच् + ल्युट्) काम्यदानम् । इति प्रवारणशब्दटीकायां सारसुन्दरी ॥

प्रहारवल्ली, स्त्री, (प्रहारोपशमा आघातजन्यवेदनादिनाशिका वल्ली लता । शाकपार्थिवादित्वात् मध्यपदलोप: ।) मांसरोहिणी । इति भावप्रकाश: ॥ (पर्य्यायोऽस्या यथा,—

"मांसरोहिण्यतिरुहा हत्ता चर्म्मकरी कृशा ।
प्रहारवल्ली विकशा वीरवत्यपि कथ्यते ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

प्रहास:, पुं, (प्रकृष्टो हासो यस्य ।) शिव: । इति त्रिकाण्डशेष: ॥ (कार्त्तिकेयस्य अनुचरविशेष: । यथा, महाभारते । ९ । ४५ । ६६ ।

"रणोत्कट: प्रहासश्च श्वेतसिद्धश्च नन्दक: ॥"

नागविशेष: । यथा तत्रैव । १ । ५७ । १५ ।

"पूर्णाङ्गद: पूर्णमुख: प्रहास: शकुनिर्दरि: ॥"

प्रकृष्टो हासो यस्मात् ।) नट: । इति धरणि: ॥ (प्रकृष्टो हास: प्रकाशो यस्य ।) सोमतीर्थम् । इति जटाधर: ॥ (प्रकृष्टो हास इति ।) अट्टहास: । इति शब्दरत्नावली ॥ (यथा, कामन्दकीये । ५ । २० ।

"न नर्म्मसचिवै: सार्द्धं किञ्चिदप्यप्रियं वदेत् ।
ते हि मर्म्माण्यभिन्दन्ति प्रहासेनापि संसदि ॥"

प्रहासी,[न्]पुं,प्रकृष्टं हासयति हसति च य: । (प्र + हस् + णिच् वा + णिनि: ।) हासकारक: भाँड़ इति भाषा । तत्पर्य्याय: । वासन्तिक: २ केलिकिल: ३ वैहासिक:४ विदूषक:५ प्रीतिद: ६ । इति हेमचन्द्र: । २ । २४५ ॥ (हासकारिणि, त्रि । यथा, अथर्व्ववेदे । ८।६।१४ ।

"आपाकेस्था: प्रहासिनस्तम्बे ये कुर्व्वते ॥")

प्रहि:, पुं, (प्रकर्षेण ह्रियतेऽत्रेति । प्र + हृ + "प्रहरते: कूपे ।" उणा० ४ । १३४ । इति इण् । स च डित् ।) कूप: । इत्यमर: ।१।१०।२६

प्रहितं, क्ली, (प्रधीयते स्मेति । प्र + धा + क्त: ।) सूप: । इति हेमचन्द्र: । ३ । ६१ ॥ (प्र + हि प्रेरणे + क्त ।) क्षिप्ते, त्रि । इति निरस्तशब्दटीकायां भरत: ॥

प्रहीण:, त्रि, (प्र + ओ हा त्यागे + क्त । "घुमास्थागेति ।" ६ । ४ । ६६ । इति आत ईत् । "ओदितश्च ।" ८ । २ । ४५ । इति निष्ठातस्य न: । ततो णत्वम् ।) परित्यक्त: । प्रपूर्व्वहाधातो: कर्म्मणि क्त: । इति मुग्धबोधव्याकरणम् ॥ यथा,—

"प्रहीणपूर्व्वध्वनिनाधिरूढ़-
स्तुलामधारेण शरद्घनेन ॥"

इति रघुकाव्यम् ॥

प्रहुतं, क्ली, (प्रहूयते स्मेति । प्र + हु + क्त: ।) भूतयज्ञ: । इति जटाधर: ॥ (यथा, मनु: । ३ । ७३—७४ ।

"अहुतञ्च हुतञ्चैव तथा प्रहुतमेव च ।
ब्राह्म्यं हुतं प्राशितञ्च पञ्च यज्ञान् प्रचक्षते ॥
जपोऽहुतो हुतो होम: प्रहुतो भौतिको बलि: ।
ब्राह्म्यं हुतं द्विजाग्र्यार्च्चा प्राशितं पितृतर्पणम् ॥")

प्रहेणकं,क्ली,(प्रहेलकम् । पृषोदरादित्वात् लस्य ण: ।)पिष्टकविशेष: । तत्पर्य्याय: । वाचनम् २ प्रतीपायनम् ३ । इति त्रिकाण्डशेष: ॥ प्रहेलकम् ४ वाचनकम् ५ । इति हारावली १५२

प्रहेलकं, क्ली, (प्रहिलति स्वादादिना अभिप्रायं सूचयतीव । प्र + हिल भावसूचने + ण्वुल् । प्रहिलति वेष्टयतीति । प्र + हेल ण्वुल् वा ।) प्रहेणकम् । इति हारावली । १५२ ॥

प्रहेलिका, स्त्री, (प्रहिलति अभिप्रायं सूचयतीति । प्र + हिल अभिप्रायसूचने + क्वुन् । टापि अत इत्वम् ।)दुर्व्विज्ञानार्थप्रश्न: । कूटार्थभाषिता कथा । हेयालि इति भाषा । तत्पर्य्याय: । प्रवल्हिका २ । इत्यमर: ।१।६।६ ॥ प्रवह्लिका ३ प्रवह्लि: ४ प्रवह्ली ५ प्रहेलि: ६ इति भरत: ॥ प्रश्नदूती ७ प्रवह्लीका ८ । इति शब्दरत्नावली ॥ तस्या लक्षणम् ।

"व्यक्तीकृत्य कमप्यर्थं स्वरूपार्थस्य गोपनात् ।
यत्र बाह्यान्तरावर्थौ कथ्येते सा प्रहेलिका ॥
सा द्विधार्थी च शाब्दी च विख्याता प्रश्नशासने
आर्थी स्यादर्थविज्ञानात् शाब्दी शब्दस्य भङ्गत: ॥"

आर्थी । यथा,—

"तरुण्यालिङ्गित: कण्ठे नितम्बस्थलमाश्रित: ।
गुरूणां सन्निधानेऽपि क: कूजति मुहुर्मुहु: ॥"

पानीयकुम्भ इति ॥ शाब्दी यथा,—

"सदारिमध्यापि न वैरियुक्ता
नितान्तरक्ताप्यसितैव नित्यम् ।
यथोक्तवादिन्यपि नैव दूती
का नाम कान्तेति निवेदयन्ति ॥"

सारिका । इति विदग्धमुखमण्डनम् ॥

प्रह्राद:, पुं, (प्रह्रादते इति । प्र + ह्राद शब्दे + अच् । यद्वा, प्रह्लादयतीति । प्र + ह्लाद + णिच् + अच् । रलयोरैक्यम् । प्रह्लाद: । स च हिरण्यकशिपो: पुत्त्र: परमवैष्णव: । (यथा, हरिवंशे । ३ । ७१ ।

"हिरण्यकशिपो: पुत्त्राश्चत्वार: प्रथितौजस: ।
अनुह्रादश्च ह्रादश्च प्रह्रादश्चैव वीर्य्यवान् ॥")

तस्य चरित्रादिकं प्रह्लादशब्दे द्रष्टव्यम् ॥ (जनपदविशेष: । यथा, महाभारते ।६।९।४६

"मल्ला: सुदेष्णा: प्रह्रादा माहिषा: शशिकास्तथा ॥")

प्रह्लत्ति:, स्त्री, (प्र + ह्लाद् + क्तिन् । ह्रस्व: ।) प्रीति: । (ह्लादे: स्व: क्तौ च । ") इति मुग्धबोधव्याकरणम् ॥

प्रह्लन्न:, त्रि, (प्र + ह्लाद + क्त । "ह्लादो निष्ठायाम् ।" ६ । ४ । ९५ । इति ह्रस्व: । प्रीत: । इत्यमर: । ३ । १ । १०३ ॥

प्रह्लाद:,पुं,(प्रह्लादयतीति । प्र + ह्लाद् + णिच् + अच् ।) प्रह्राद: । स च पूर्व्वजन्मनि शिवशर्म्मण: पुत्त्र: सोमशर्म्मनामाभूत् ततो दैत्यभावनया मृत: अनन्तरं कमलायां हिरण्यकशिपो: सकाशाद्दैत्यभावेन जात: । यथा,

सूत उवाच ।

"स लोष्टेन समं मेने काञ्चनं भूषणं पुन: ।
जिताहार: स धर्म्मात्मा निद्रया परिवर्जित: ॥
विषयान् स परित्यज्य एकान्तमपि सेवते ।
योगासनसमारूढ़ो निराशो निष्परिग्रह: ॥
तस्य वेलां सुसंप्राप्य मृत्युकाल: समागत: ।
आगतान् दानवान् विप्र: सोमशर्म्मा व्यलोकयत् ॥
मृत्युकाले तु संप्राप्ते प्राणयात्राप्रवर्त्तके ।
शालग्रामे महाक्षेत्रे ऋषीणामेव सन्निधौ ॥
केचिद्वदन्ति वै दैत्या: केचिद्वदन्ति दानवा: ।
एवंविधो महाशब्द: कर्णरन्ध्रगतस्तदा ॥
तस्यैव विप्रवर्य्यस्य सुविप्र: सोमशर्म्मण: ।
ज्ञानध्यानात् प्रचलत: प्रविष्टं दैत्यजं भयम् ॥
तेन ध्यानेन तस्यापि दैत्यभूतेन वै तदा ।
सत्वरं तस्य वै प्राणा गतास्तस्य महात्मन: ॥
दैत्यभावेन संयुक्त: स हि मृत्युवशं गत: ।
तस्माद्दैत्यगृहे जातो हिरण्यकशिपोस्तदा ॥
देवासुरे महायुद्धे निहतश्चक्रपाणिना ।
युध्यमानेन तेनापि प्रह्लादेन महात्मना ॥
सुभृशं वासुदेवं तद्विश्वरूपं विचिन्तितम् ।
योगाभ्यासेन पूर्व्वेण ज्ञानमासीन्महात्मन: ॥
सस्मार पौर्व्विकं सर्व्वं चरित्रं शिवशर्म्मण: ।
सोऽप्यहं सोमशर्म्मा वै प्रविष्टो दानवीं तनुम् ॥
कस्य कार्य्यं कदा पुण्यं केवलं ध्यानमुत्तमम् ।
प्रयामि च महापुण्यैर्ज्ञानाख्यैर्मोक्षदायिभि: ॥
समरे प्रोयमाणेन प्रह्लादेन महात्मना ।
एवं चिन्ता कृता पूर्व्वं श्रूयतां द्विजसत्तम ! ॥
एतत्ते सर्व्वमाख्यातं सर्व्वसन्देहनाशनम् ॥"

सूत उवाच ।

"प्रह्लादे तु हते संख्ये देवदेवेन चक्रिणा ।
संह्रादे च महावीर्य्ये तस्मिंश्च कालनेमिनि ॥
प्रह्लादस्य तु या माता हिरण्यकशिपो: प्रिया ।
प्रह्लादस्य महाशोकैर्दिवा रात्रौ प्रशोचति ॥
पतिव्रता महाभागा कमला नाम दु:खिता ।
खिद्यमाना दिवा रात्रौ नारदस्तामुवाच ह ॥
मा शुचस्त्वं महाभागे पुत्त्रार्थं पुत्त्रभागिनि !
निहतो वासुदेवेन तव पुत्त्र: समेष्यति ॥
तद्रूपलक्षणोपेतस्त्वत्रोदरे महामति: ।
प्रह्लादेति च वै नाम पुनरस्य भविष्यति ॥
विद्येन आसुरैर्भावैर्वैष्णवेन समन्वित: ।